श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ सुभाषितपद्धतिः अष्टाविंशी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ सुभाषितपद्धतिः अष्टाविंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

कलासु काष्ठामातिष्ठन् भूम्ने सम्बन्धिनामपि।
पादुका रङ्गधुर्यस्य भरताराध्यतां गता॥ २८.१ ॥

सन्तः स्वदेशपरदेशविभागशून्यं
हन्त स्ववृत्तिमनघां न परित्यजन्ति।
राज्ये वने च रघुपुङ्गवपादरक्षा
नैजं जहौ न खलु कण्टकशोधनं तत्॥ २८.२ ॥

ब्रह्मास्त्रतामधिजगाम तृणं प्रयुक्तं
पुण्यं शरव्यमभवत् पयसान्निधिर्वा।
पृथ्वीं शशास परिमुक्तपदं पदत्रं
किं वा न किं भवति केळिविधौ विभूनाम्॥ २८.३ ॥

अन्येषु सत्स्वपि नरेन्द्रसुतेषु दैवाद्
भ्रष्टः पदादधिकरोति पदं पदार्हः।
प्रायो निदर्शयति तत् प्रथमो रघूणां
तत्पादयोः प्रतिनिधी मणिपादुके वा॥ २८.४ ॥

चरणमनघवृत्तेः कस्यचित्प्राप्य नित्यं
सकलभुवनगुप्त्यै सत्पथे वर्तते यः।
नरपतिबहुमानं पादुकेवाधिगच्छन्
स भवति समयेषु प्रेक्षितज्ञैरुपास्यः॥ २८.५ ॥

रामे राज्यं पितुरभिमतं सम्मतं च प्रजानां
माता वव्रे तदिह भरते सत्यवादी ददौ च।

चिन्तातीतः समजनि तदा पादुकाग्र्याभिषेको
    दुर्विज्ञानस्वहृदयमहो दैवमत्र प्रमाणम्॥ २८.६ ॥

नातिक्रामेच्चरणवहनात्पादुका पादपीठं
    यद्वाऽऽसन्नं परमिह सदा भाति राजासनस्य।
पूर्वत्रैव प्रणिहितमभूद्धन्त रामेण राज्यं
    शङ्के भर्तुर्बहुमतिपदं विक्रमे साहचर्यम्॥ २८.७ ॥

प्रतिपदचपलाऽपि पादुका
    रघुपतिना स्वपदे निवेशिता।
समजनि निभृतस्थितिस्तदा
    भवति गुणः श्रियमभ्युपेयुषाम्॥ २८.८ ॥

गतिहेतुरभूत् क्वचित्पदे स्थितिहेतुर्मणिपादुका क्वचित्।
न हि वस्तुषु शक्तिनिश्चयो नियतिः केवलमीश्वरेच्छया॥ २८.९ ॥

अधरीकृतोऽपि महता तमेव सेवेत सादरं भूष्णुः।
अलभत समये रामात् पादाक्रान्ताऽपि पादुका राज्यम्॥ २८.१० ॥

॥ इति श्रीपादुकासहस्रे सुभाषितपद्धतिः अष्टाविंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥